No. 31. Karma Prakriti with Commentary
(257 Leaves)

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

कर्मप॥
टी० १

॥ऐँ॥ नमो वीतरागाय। प्रणम्य कर्मद्रुमचक्रनेमिं जिनं महत्सुराधीशमरिष्टनेमिं। कर्मप्रकृत्याः
कियतां पदानां सुखावबोधाय करोमि टीकां॥ अयं गुणः हि लिङ्गतः समवायादसदादिवदन्तो
दकिंचित् उपाधिसंपर्कवशाद्विशेषेणालोक्यते यथा स्फटिकोपलस्य। इह शिष्टाः क्वचिदिष्टव-
स्तुनि प्रवर्त्तमानाः सन्त इष्टदेवतानमस्कारपुरस्सरमेव प्रवर्त्तन्ते तदाचार्योऽपि शिष्ट इति शिष्ट-
समयपरिपालनाय तथा श्रेयांसि बहुवि। घ्नानि भवन्ति उक्तं च श्रेयांसि बहुविघ्नानि भवन्ति म-
हतामपि अश्रेयसि प्रवृत्तानां क्वापि यान्ति। विनायका इति इदं च प्रकरणं सम्यग्ज्ञानादे-
र्हेतुत्वात् श्रेयोभूतमतो मा भूदत्र विघ्न इति विघ्नविनाशकोपशान्तये इष्टदेवतान-
मस्कारं तथा चाप्रेक्षापूर्वकारिणः क्वचि दपि प्रयोजनादिविरहे न प्रवर्त्तन्त इति प्रेक्षावतां
प्रवृत्त्यर्थं प्रयोजनादिकं च प्रतिपादयितुं सूत्रकार इदमाह॥ सिद्धं सिद्धत्थसुयं वंदिय निद्धो-
य सव्वकम्ममलं कम्मट्ठगस्स [illegible] करणं अट्ठुदयसंताणि वोच्छामि॥ इह पूर्वार्द्धेन इष्टदेवता-
नमस्कारस्याभिधानेनोत्तरार्द्धेन तु प्रयोजनादीनां तत्रासितं बद्धं ध्मातं तस्मात्कृतमष्टप्रकारं कर्म ये-
न स सिद्धः षिधादश [illegible] दिष्टमपुनिवृत्तिया याकृतः सादन्त्यपामिमिह्मपाऽथवा तं वंदि- १
त्वेति क्रियायोगः सर्वनामतापि कश्चित्स्यविद्यासिद्धादिर्वा सिद्ध इति लोकप्रतीतस्तस्य

व्यवच्छेदार्थं यथाख्यातार्थस्यैव कामवविशेषणमाह निर्धौतसर्वकर्ममलं नितरामत्यन्तं धौतं क्षालितं।
सम्यग्दर्शनज्ञानचारित्रतपःसलिलप्रक्षालनापगमितसर्वपापकर्मवाष्टप्रकारं तदेव मालिन्यहेतु-
त्वात् मल इव मलो येन स निर्धौतसर्वकर्ममलः अनेनानादिशुद्धत्वं सदाशिववादप्रतिक्षेपश्चाविदितो
द्रष्टव्यः। विशेष्यमाह सिद्धार्थसुतं सिद्धार्थस्य सिद्धार्थनरेन्द्रस्य सुतमपत्यं वर्द्धमानमित्यर्थः। अनेन नाग-
नरामराधिपपूज्यत्वादिगुणसंपत्प्रकर्षमाह। अथ वा सिद्धमिति विशेष्यं सिद्धार्थसुतमिति विशेषणं।
तत्र सिद्धार्थं सिद्धप्रयोजनं संसारविस्तारणं। स्पष्टत्वाद्वाच्यत्वाद्वा सांगं यस्यास्तत्सिद्धार्थं।
कृतत्वं ज्ञानेन कृतस्य संसारनिस्तारणं। एतद्विकल्पसामर्थ्यमावेद्यते सिद्धार्थाः।
र्थाः सिद्धप्रयोजना मोक्षप्राप्तिलाभात्तेन इत्युक्ताः शिष्या गणधरादयस्तस्य सिद्धार्थः।
सुतः तं ज्ञानेन लगवता संततैरपि विशिष्टफ लानि गच्छत् क्रमाविदयति अतः पुनर्भगवान्
प्रेक्षावतां प्रणमार्हः तं इत्थं स्तुतं वंदित्वा किमित्याह वक्ष्यामि प्रतिपादयिष्यामि कर्माष्टकस्य बंध-
संक्रमादिहेतुरूतं करणाष्टकं उदयसत्ताचतत्र कर्माष्टकं ज्ञानावरणदर्शनावरणवेदनीय-
मोहनीयायुर्नामगोत्रान्तरायरूपं एतच्चाप्यप्रपंचसंग्रहादौ सप्रपंचमभिहितमिति नेह वक्ष्यते
किंचित्तु गुणाय धारणाय नमस्कारमादिकारणेऽस्मिन्नाम योगोज्ञाय रूपाणामष्टकं करण
Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

कर्मप्र टी
२

णा इहकर्मबंधनादिविवक्षमाणं तथा कर्मपुद्गलानां यथास्थितिबद्धानामबाधाकालक्षयेणापवर्तनादि।
करणविशेषात्तावदुदयसमयप्राप्तानामुदयनमुदयः। तथा सर्वकर्मपुद्गलानां बंधसंक्रमास्या।
लब्धात्मलाभानां निर्जरणसंक्रमकृतस्वरूपप्रच्युत्यभावे सति सद्भावः सत्ता। इह करणाष्टकोदय।
सत्ताख्यनिबंधः। तत्परिज्ञानार्थमावरणमनंतरंचयाज्ञंतत्राचार्यस्यचनंतरंचयोजनंपरात्परंपरं।
राश्याज्ञनंतत्तायाश्चिंतिताद्यस्यावाप्तिः संबं धप्रतिपादनायप्रस्तावलक्षणः। तथाहिबंधनस्या
प्रवेशकरणमुपायः। तत्परिज्ञानायपुनरपि तिनत्रयायामादेशातिदेशादिनियायाम्प्रमतः॥
करणाष्टकमतिविस्तरादव बंधणसं कमणुव्वट्टणायअववट्टणाउदीरणया॥
र्यद्व उवसामणा निहत्ती उ निकायणा च त्तिकरणाइं इहकरणशब्दस्य संप्रतिमा। ना
धिकरणात्रिप्रकारस्त्यकं करणशब्दार्थात्। संबंधनीयः। तद्यथा बंधनकरणं संक्रमकरणमि॥
त्यादि तत्र बंधननामकर्मपुद्गलानां जीवप्रदेशैः सह वह्न्ययःपिंडवदन्योन्यानुगमः। संक्रमः प्रकृ।
तिस्थित्यनुभागप्रदेशानामन्यकर्मरूपतया स्थितानामन्यकर्मस्वरूपेण व्यवस्थापनं स्थित्यनुभा
गयोर्दीर्घकरणमुद्वर्तना तयोरेव ह्रस्वीकरणमपवर्तना कर्मपुद्गलानामकालप्राप्तानामुदयाव २
लिकायां प्रवेशनमुदीरणा कर्मपुद्गलानामुदयोदीरणानिधत्तिनिकाचनाकरणायोग्यत्वेन व्यव
र्यत

स्थापनमुपशामना। उद्वर्तनापवर्तनाव्यतिरिक्तशेषकरणायोग्यत्वेन स्थापनं निधत्तिः। समस्तकरणा।
योग्यत्वेन व्यवस्थापनं निकाचना। उक्तस्वरूपबंधादिनिबंधनं तत्र जीववीर्यविशेषो बंधनादी
करणानि। तथा च कृत्स्नशिक्षा वा तथाहि बध्यते अष्टप्रकारं कर्म येन तद्बंधनं संक्रम्यते अन्यत्र
दिरूपतया व्यवस्थाप्यते येन तत्संक्रमणं उद्वर्त्यते प्राबल्येन प्रवृत्ता क्रियते स्थित्यादि यया जीव
वीर्यविशेषपरिणत्या सा उद्वर्तना। अपवर्त्य ते ह्रस्वीक्रि[illegible]यते स्थित्यादि यया।
सा अपवर्तना। अनुदयप्राप्तं सत्कर्म उदा। लिकायां दीयते उदयावलिकायां प्रवेश्यते य
या सा उदीरणा। उपशाम्यते उदयो दीरणा निधत्ति निकाचनाकरणायोग्यत्वेन ध
व्यवस्थाप्यते कर्म यया सा उपशामना। नि धीयते उद्वर्तनापवर्तनावर्जकरणायोग्य॥
त्वेन व्यवस्थाप्यते यया सा निधत्तिः। प्राकृत। रादिवाद्व्युत्पत्तिनिधत्तिः। तथा करणं बंधान्नितरां
कच्यते स्थाप्यते अवबंधमाद्याति कर्म जीव प्रदेशाविधर्मे श्लिष्टाध्यवसायपरिणतस्य तत्वेन उक्तं जी
वप्रवनबाउत्कृष्टाल्पनसवनानततः प्रायाकृत्यापापारणिक्र ताता निकाच्यते अवस्थाप्य तयाव्यव य
स्थाप्यते कर्म जीवेन यया सा निकाचना अथवा कचबंधने इति वोरादिका प्रस्तिः तातानिकाच्य
ते अवश्यवेद्यतया निबध्यते यया कर्म सा निकाचना जीववीर्यविशेषपरिणतिः। चः समुच्चये इ।

तिपरिसमाप्तौ एतावंत्येव करणानि नाधिकानि करणानि चामूनि जीववीर्यविशेषरूपाणि ।
ति अथ प्रसंगतो वीर्यमेव प्ररूपयति ॥ विरियंतरायदेसक्खएण सव्वक्खएण वा लद्धी । अभिसंधि- य
जमियरं वा तत्तो विरियं सलेसस्स ॥ वीर्यान्तरायस्य देशक्षयेण छद्मस्थानां सर्वक्षयेण केवलिनां ।
तस्याश्च वीर्यलब्धेः सकाशात् तदुपजायमानं वीर्यं सलेस्यस्यापि भवति अलेस्यस्यापि केवलि-
नः सिद्धस्य च अलेस्यवीर्येणाधिकार इति तदेवोपदर्शयति अभिसंधिजमियरं वा तत्तो विरियं
सलेसस्स तत्तस्याः क्षायिक्याः क्षायोपशमिक्या वा वीर्यलब्धेः सकाशात् सले-
श्यस्य वीर्यमभिसंधिजमितरद्वा भवति तत्र यत् बुद्धिपूर्वकं धावनवल्गनादिक्रि-
यासु नियुज्यते तदभिसंधिजं इतरत्तु अनभिसंधिजं यत् भुक्तस्याहारस्य धातुमलरूप-
परिणामापादनकारणं एकेंद्रियाणां वा तत्तत्क्रियानिबंधनं एतच्चाभिसंधिजमनभिसंधिजं
वा वीर्यं सर्वं सूक्ष्मबादरपरिस्पंदरूपक्रियासहितं योगसंज्ञमाप्नुते तदेव एकाधि-
कानि नामान्याह जोगो विरियं थामो उच्छाह परक्कमो तहा चेट्ठा सत्ती सामत्थं चिय जोगस्स हवंति ३
पज्जाया इति सुगमं नवरं योगो वा योगस्य परिणामादिहेतुत्वात् ... ।
... कारणं च प्रतिपादयति ... परिणामालंबणगहणसाहणं तेण लद्धनामतिगं कत्

ज्ञात्वा ... परिणमनं परिणामः । ग्रहणं ततः पुद्गलानां परिणामापादनमित्यर्थः ।
आलंबनं इति अवलंबनं तावत् इति ग्रहणं तत्साधनं साध्यतेऽनेनेति साधनं योगसंज्ञं वी-
र्यं करणमित्यर्थः तथाहि तेन विशेषेण वीर्येण योगसंज्ञकेन औदारिकादिशरीरप्रायोग्यान् पुद्गलान् ग्र-
हणाति गृहीत्वा च औदारिकादिरूपतया परिणमयति तथा प्राणापानभाषामनःप्रायोग्यान् पुद्ग-
लान् प्रथमतो गृह्णाति गृहीत्वा च प्राणापानादिरूपतया परिणमयति परिणमय्य च तन्निसर्गहेतुसामर्थ्य-
विशेषसिद्धये तानेव पुद्गलानवलंबते यथा मंदशक्तिः कश्चिन्नगरपरिभ्रमणाय यष्टिमव-
ष्टभते तावता जातसामर्थ्यविशेषः सन् ततः प्राणापानादिपुद्गलान् विसृजतीति परिणा-
मालंबनग्रहणसाधनं वीर्यं तेन च वीर्येण योगसंज्ञकेन मनोवाक्कायोपष्टंभाज्जायमा-
नेन लब्धनामानि त्रीणि तथाहि मनोयोगो वाग्योगः काययोग इति तत्र मनसा करणेन येन
योगो मनोयोगः वाचा योगो वाग्योगः कायेन योगः काययोगः स्यादेतत् मा भवतु जीवस्य वा-
चा ... लब्धिनापि किमिति केचिन्नात्मा ... तस्मात् कथमेतदेवं विशे-
षेण वीर्यस्य उपलब्धत इत्यत्राह कायाद्यादि यद्यपि तत्कार्यं त्रयाणामपि । अत्र मनसश्चाम ॥
अत इत्यामात्विति ... कार्यतयाम ... कार्यस्याम ... नानि ... ।

कं०प्र०टी०
४

तथा जीवप्रदेशानामप्यन्योन्यं परस्परं शृंखलावयवानामिव परस्परसंबंधविशेषात्तास्योक्ता।
द्याविषमीकृताः सर्वप्रकृताल्पाल्पतरमात्रावतो विसंस्थूलीकृताः प्रदेशा जीवप्रदेशा येन वीर्येण तत् ॥
करणं। तत्र सामान्याद्यवयवविषमाः करणप्रदेशतया हियमाणा आत्मप्रदेशानां स्वादिगतानां सुत्पाद्य
मानस्पंदितक्रियार्थं नेकद्यातघाघहतत्तरावष्टाः इश्वासानामंसादिगतानां स्वल्पाः इतरस्थानां च
पादादिगतानां स्वल्पतराः अतत्र्यमपि चैतन् अपि चालोष्टादिनाभिघातसमतियद्युपिमर्दप्र-
देशो भवति परमार्थतः तदा तस्मिन्प्रभावे नेपलायते तस्मादपि येषां आत्मप्रदेशानामतिघातकालोष्टादिद्रव्यादेनेक- आ
देशे तेषां तद्यत्तरावदनादशापाणो मंदं। दामंदतरा नामेवापि जीवप्रदेशाः परिस्पंदा
त्मकं वीर्यमुपजायमानं कार्यद्रव्याणामेव शाताकम्भवितप्रहतमात्मसमंदमपरम्भेव च मंदं।
तमंदं भवति एतदेवं जीवप्रदेशानां परस्परसंबं- धविशेषमतिवर्तितानाम्यथा यथा शृंखलावय-
वानां तथाविधे तेषां शृंखलावयवानां परस्परसंबंधविशेषमति एकस्मिन्नवयवे परिस्पंदमाने अपरा-
ण्यवयवाः परिस्पंदंते केवलं कश्चित् शाकलाकमपरस्ताकतरमिति संबंधविशेषात्तावदेकस्मिन्न-
वलंबितान् परस्परावध्यं तान्वित्वन्नेयथायोगाम्... तस्मात्कार्यद्रव्याणामेव जातानां जीवप्रदेशानां प- ४
रस्परं संबंधविशेषतया वीर्ये जीवप्रदेशेषु केषुचित् प्रकृतमल्पमल्पाकमपरेषु अल्पाकतरमिति

वै

बंधनस्य प्रणपजायमानं ज्ञेयमिति तदेवं व्याख्यातं पादं संप्रत्यस्यैव योगस्य व्याख्यानाय उत्कृष्टाद्युत्कृष्टवप-
रिज्ञापनाय प्ररूपणाविकाराणि इमानधिकारानाह ॥ अविभागवग्गफड्डुगअंतरठाणं अणंतरोव-
णिहा। जोगे परंपरवुड्ढि समयजीवप्पबहुगं च ॥ योगे योगविषये प्रथमतोऽविभागप्ररूपणा।
कार्या ततो वर्गणाप्ररूपणा ततः स्पर्धकप्ररूपणा तदनंतरमंतरप्ररूपणा ततः स्थानप्ररूपणा ततो-
ऽनंतरोपनिधया ततः परंपरोपनिधया तदनंतरं वृद्धि- प्ररूपणा ततः समयप्ररूपणा ततो जीवानामल्पब-
हुत्वप्ररूपणेति तत्र यस्यांशस्य प्रज्ञाच्छेद- नाकेन विभागः कर्तुं न शक्यते सोऽविभाग उ-
च्यते किमुक्तं भवति इह जीवस्य वीर्यं। केवलिप्रज्ञाछेदनकेन छिद्यमानं यदा वि-
भागं न प्रयच्छति तदा स अंतिमोऽंशोऽवि- भागः ते चाविभागा एकैकस्मिन् जीवप्रदेशे
यावंतो भवंति तावंतस्तानाह ॥ पन्नाछेयणछिन्ना लोगासंखेज्जगप्पएससमा। अविभागा एक्केक्के होंति सो×
पएसे जहन्नेणं ॥ प्रज्ञाछेदनकेन छिन्नाः संतो ये वीर्यस्याविभागा जातास्ते एकैकस्मिन् जीवप्रदे-
शे विद्यमाना जघन्येनाप्यसंख्येयलोकाकाशप्रदेशप्रमाणा उत्कर्षतोऽप्यसंख्या एव किंतु ॥
तज्जघन्यपदभाविवीर्याविभागापेक्षयाऽसंख्येयगुणा द्रष्टव्याः। उक्ताऽविभागप्ररूपणा संप्रति व-
र्गणाप्ररूपणामाह ॥ जेसिं पएसाण समा अविभागा सव्वतो य थोवतमा। ते वग्गणा जहन्नाऽविभाग॥

×छेयण×५

कर्म०टी० ५

द्विप्रयोपरे॥ विधो जीवप्रदेशानां समासः असंख्या वीर्याविभागा भवंति सर्वतस्तु सर्वस्तोका अपि जीवप्र
देशगतवीर्याविभागास्ताः कतमा ते जीवप्रदेशा घनीकृतलोकासंख्येयप्रतरगतासंख्येय
प्रतरगतप्रदेशराशिप्रमाणाः समुदिता एका वर्गणा सा च जघन्या स्तोकाविभागयुक्तत्वात् अवि
भागाधिकाः परंपरतः इति ततः परा वर्गणा एकैकेनाविभागेनाधिका वक्तव्या तद्यथा जघन्यवर्गणा
तः परा ये जीवप्रदेशा एकेन वीर्याविभाग॥ नाभ्यधिका घनीकृतलोकासंख्येयप्रतरगतसं।
ख्येयप्रतरगतप्रदेशराशिप्रमाणा वर्तंते। तेषां समुदायो द्वितीया वर्गणा ततः परं द्वाभ्यां वी
र्याविभागाभ्यामधिकानां तु क्रमसंख्या॥ कानामेव जीवप्रदेशानां समुदायस्तृतीया
वर्गणा ततोऽपि त्रिभिर्वीर्याविभागैरधि। कानां तावत्संख्याकानामेव जीवप्रदेशानां स
मुदायश्चतुर्थी वर्गणा एवमेकैकवीर्यावि भागवृद्ध्या वर्धमानानां तावतां जीवप्रदेशानां समु
दायरूपा वर्गणा असंख्येया वक्तव्याः ताश्च कियत्य इति तत्प्ररूपणार्थं स्पर्धकप्ररूपणामाह सेढि
असंखियमेत्ता फड्डगमेगं अणंतरा नत्थि जाव असंखा लोगा तो बीयाई य पुव्वसमा इह घनीकृ
तस्य लोकस्य या एकैकप्रदेशपंक्तिरूपा श्रेणिस्तस्याः श्रेणेरसंख्येयतमे भागे यावंत आका। ५
शप्रदेशास्तावन्मात्रास्तावत्प्रमाणा याः प्रागुक्तस्वरूपा वर्गणाः समुदिता एकं स्पर्धकं स्पर्धंत इवात्रो

त्तरवृद्ध्या वर्गणा अत्रेति स्पर्धकं कृत्यल्युटो बहुलमिति वचनादधिकरणे घञ् उक्ता स्पर्धकप्ररूपणा सांप्र
तमंतरप्ररूपणामाह नत्थि अणंतरा न वि इत्यादि आद्यस्पर्धकान्तवर्गणायाः परतो जीवप्रदेशा अनं इत*
तरा न संति किंतु क्रमेण वर्धमाना इत ऊर्ध्वमेकैकवीर्याविभागवृद्ध्या निरंतरं वर्धमाना जीवप्रदेशा न लभ्यंते
किंतु सांतरा एव तथाहि सर्वाद्यस्पर्धकस्य चरमवर्गणायाः परतो जीवप्रदेशा नैकेन वीर्याविभागे
नाधिकाः प्राप्यंते नापि द्वाभ्यां नापि त्रिभिः नापि चतुर्भिर्यावन्नापि संख्येयैः किंत्वसंख्येयैरेवास॥
ख्येयलोकाकाशप्रदेशप्रमाणैरभ्य। धिकाः प्राप्यंते ततस्तेषां समुदायो द्वितीयस्य॥
स्पर्धकस्य प्रथमा वर्गणा तो बीयाई य पुव्व समन्वितानां द्वितीयस्पर्धकस्य प्रथमा वर्गणा ततः प
रतो द्वितीयादया वर्गणा पूर्वसमाः पूर्वस्पर्धकवद्वक्तव्या इत्यर्थः तत्राद्य प्रथमवर्ग।
णायाः परतो जीवप्रदेशानामेकेन वीर्यावि भागेनाधिकानां समुदायो द्वितीया वर्गणा। द्वा।
भ्यां वीर्याविभागाभ्यामधिकानां समुदायस्तृतीया वर्गणा एवं तावद्वाच्यं यावच्छ्रेण्यसंख्येयभा।
गतप्रदेशराशिप्रमाणा वर्गणा भवंति तासां च समुदायो द्वितीयं स्पर्धकं ततः परं पुनरप्येकेन वी
र्याविभागेनाधिका जीवप्रदेशा न लभ्यंते नापि द्वाभ्यां नापि त्रिभिर्यावन्नापि संख्येयैः किंत्वसंख्ये।
यैरेवासंख्येयलोकाकाशप्रदेशप्रमाणैरभ्यधिकाः प्राप्यंते ततस्तेषां समुदायस्तृतीयस्य स्पर्धक

कर्म्मप० ६ स्य प्रथमा वर्गणा ततः एकैकवीर्याविभागवृद्धा द्वितीयादयो वर्गणास्तावद्वाच्या यावच्छ्रेण्यसं-
ख्येयभागगतप्रदेशराशिप्रमाणा भवंति तासां च समुदायः द्वितीयं स्पर्द्धकं एवमसंख्येयानि स्पर्द्ध-
कानि वाच्यानि तदेवं कृता स्पर्द्धकप्ररूपणा संप्रति स्थानप्ररूपणां करोति ॥ सेढिअसंखियमित्ताइं
फड्डगाइं जहन्नयं ठाणं फड्डगपरिवुड्ढि अओ अंगुलभागो असंखतमो । इह यावंति स्पर्द्धकानि श्रे-
ण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि । जघन्यं योगस्थानं भवंति एतदुक्तं सूक्ष्मनिगोदस्य सर्व-
वाल्पवीर्यस्य भवप्रथमसमये वर्त्तमानस्य । स्य प्राप्यादि ततोऽन्यस्य जीवस्याधिकतरवीर्यस्य
यान्यल्पतरवीर्याणि जीवप्रदेशास्तेषां समु- दायः प्रथमा वर्गणा ततः एकैकवीर्याविभागा-
धिकानां समुदायो द्वितीया वर्गणा द्वयोः वीर्याविभागाभ्यामधिकानां समुदायः तृतीया
वर्गणा त्रिभिर्वीर्याविभागैरधिकानां समुदा- यश्चतुर्थी वर्गणा एवं तावद्वाच्या यावच्छ्रेण्यसंख्ये-
यभागगतप्रदेशराशिप्रमाणा भवंति तासां समुदायः प्रथमं स्पर्द्धकं ततः प्राक्तनयोगस्थानप्रदर्शि-
तप्रकारेण द्वितीयादीन्यपि स्पर्द्धकानि वाच्यानि तानि च तावद्वाच्यानि यावच्छ्रेण्यसंख्येयभागगत-
प्रदेशराशिप्रमाणानि भवंति ततस्तेषां समुदायो द्वितीयं योगस्थानं ततोऽन्यस्य जीवस्याधिकतर- ६
वीर्यस्योपदर्शितप्रकारेण तृतीयं योगस्थानं वाच्यं एवमन्यान्यजीवापेक्षया तावद्योगस्थानानि ॥

त्र

नि वाच्यानि यावत्सर्वोत्कृष्टं योगस्थानं भवति इह द्वितीययोगस्थाने प्रथमस्पर्द्धकप्रथमवर्गणायां जी-
वप्रदेशाः प्रथमयोगस्थानचरमस्पर्द्धकचरमवर्गणागतवीर्याविभागापेक्षयाऽसंख्येयैर्वीर्यावि-
भागैरधिकाः प्राप्यन्ते तृतीयेपि योगस्थाने प्रथमस्पर्द्धकप्रथमवर्गणायां जीवप्रदेशा द्वितीययोगस्था-
नचरमस्पर्द्धकचरमवर्गणागतवीर्याविभागापेक्षयाऽसंख्येयैर्वीर्याविभागैरधिकाः प्राप्यंते ए-
वं सर्वेष्वपि द्रष्टव्यानि योगस्थानानि सर्वाणि । एवमपि कियंति भवंतीति चेदुच्यते श्रेण्यसंख्येय-
भागगतप्रदेशराशिप्रमाणानि ननु जीवाना- मनंतत्वात्प्रतिजीवं च योगस्थानस्य प्राप्यमाणत्वा-
दनंतानि योगस्थानानि प्राप्नुवंति ॥ कथमुच्यते श्रेण्यसंख्येयभागगतप्रदेश-
राशिप्रमाणानीति नैष दोषः यत एकैक- स्मिन् योगस्थाने सदृशाः सदृशा वर्त्तमानाः स्थाव-
रजीवा अनंताः प्राप्यंते ततः सर्वजीवापेक्षया पि सर्वाणि योगस्थानानि केवलिप्रज्ञया परिभाव्य-
त मानानि यथोक्तप्रमाणान्येव प्राप्यंते नाधिकानीति कृता स्थानप्ररूपणा संप्रत्यनंतरोपनिधा-
वसरः तत्र उपनिधानमुपनिधा मार्गणा मार्गणमित्यर्थः अनंतरेणोपनिधा अनंतरोप-
निधा अनंतरयोगस्थानमधिकृत्याग्रेतनस्य योगस्थानस्य स्पर्द्धकविषया मार्गणेत्यर्थः तदेवाह फ-
ड्डगत्यादि अत्र प्रथमात् योगस्थानात् द्वितीयादियोगस्थानेषु प्राप्यत्वे स्पर्द्धकानां परिवृद्धिरंगुलस्या

क।प्र।टी। ७

…गाद्दसंख्येयतमः। अंगुलमात्रक्षेत्रम्। किं असंख्येयतमेन भागेन यावन्तः प्रदेशास्तावत्प्रमा
णानि सर्वयोगस्थानगतस्पर्धकानि अधिकानि भवन्ति स्पर्धकप्रमवेलायां … यानि इति वक्तव्यानि इह
प्रथमयोगस्थानगतवर्गणापेक्षया द्वितीययोगस्थानगतवर्गणा … एव सर्वासु … प्र
देशा भवन्ति इह तत्र वर्गणानां प्रदेशानां स्तोकास्तोकतरतया … ततस्ततः … वि
गणवा … स्पर्धकवा …   उपपद्यत एव … योगस्थाने … सर्वस
र्वयोगस्थानगतस्पर्धकापेक्षया स्पर्धकवा।   … तदेव … तरोपनिध
सांप्रतं परंपरोपनिधया … परं   परया उपनिधामार्गणं परंपरोपनिधानां वि
कार्थ इह … असंख्येयतमभागगतेरुपद्दा।   … असंख्येयतमभागानां …
… प्रथमात् योगस्थानात् आरभ्य।   असंख्येयतमेन भागेन यावन्तः … प्रदेशा॥
स्तावन्मात्राणि योगस्थानानि गत्वा गत्वा अतिक्रम्य अतिक्रम्य यत् यत् परं योगस्थानं तत्र सर्वयोगस्था
नापेक्षया स्पर्धकानि द्विगुणानि भवन्ति। एतदुक्तं भवति प्रथमयोगस्थाने यावन्ति स्पर्धकानि भवन्ति ७
तदपेक्षया श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि योगस्थानानि अतिक्रम्य अनन्तरयोगस्थाने द्वि
गुणानि स्पर्धकानि भवन्ति। ततः पुनरपि तावन्ति योगस्थानानि अपरे तस्माद् वन्ति योगस्थानानि … परस्मिन्

योगस्थाने द्विगुणानि स्पर्धकानि प्राप्यन्ते एवं द्विगुणवृद्धिस्तावद्वाच्या यावदन्तिमं योगस्थानं कियन्ति द्वि
गुणवृद्धिस्थानानि सर्वसर्वयोगस्थानापेक्षया द्विगुणद्विगुणस्पर्धकानि भवन्तीत्यत आह पल्लासंखि
यभागो त्ति सूक्ष्मस्य अद्धापल्योपमस्य असंख्येयतमेन भागेन यावन्तः समयास्तावत्प्रमाणानि द्विगुणवृ
द्धिस्थानानि भवन्ति नाणागुणहाणि ठाणाणि ति नानारूपाणि यानि गुणहानिस्थानानि द्विगुणवृ
द्धिस्थानानि तान्यपि पल्योपमासंख्येयभाग   समयप्रमाणानि भवन्ति तथाहि उत्कृष्टात् योग
स्थानादारभ्य अधोऽधोऽवतरणमतिपद्यते॥   श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि यो
गस्थानान्यतिक्रम्य यानि भवन्ति तदादिमं अनन्तर   अधस्तनयोगस्थाने … तिमयोगस्थानगत।
स्पर्धकापेक्षया अर्धानि स्पर्धकानि प्राप्यन्ते॥   ततस्ततः पुनरपि श्रेण्यसं[illegible]ख्येयभागगतप्र
देशराशिप्रमाणेषु योगस्थानेषु अतिक्रान्तेषु अधस्तनयोगस्थाने अर्धानि प्राप्यन्ते एवं तावद्वा
च्यं यावज्जघन्यं योगस्थानमिति द्विगुणवृद्धिस्थानेभ्यस्तुल्यानि द्विगुणहानिस्थानानि यानि च … द्विगु॥
णवृद्धिस्थानानि द्विगुणहानिस्थानानि च तानि सर्वस्तोकानि तेभ्यः पुनरेकस्मिन् द्विगुणवृद्धिस्थानयो
र्द्विगुणहानिस्थानयोर्वा अन्तरे यानि योगस्थानानि तान्यसंख्येयगुणानि तदेवं कृता परंपरोपनिध
सांप्रतं द्विप्ररूपणाविकोऽर्थ इह॥ … श्रेणिम … श्रेता … समाव

×योगस्थानानि×२ ×सर्वेष्विकदाचित्हीयमानानि×२

कर्म॰प॰ लिअसंखेयगोयासमयाणो स्थायपत्रामो द्विवार्यतिरायस्य क्वचित्कदाचित्कथंचिद्वर्द्धते।
८ तन्निबंधनानि कदाचिद्धूवर्धमानानि तत्र हानिश्चतुर्धा तद्यथा। असंख्येयभागहानिः संख्येयभागहानिः
संख्येयगुणहानिः असंख्येयगुणहानिः। एवं वृद्धिरपि चतुर्धा तद्यथा। असंख्येयभा
गवृद्धिः संख्येयभागवृद्धिः संख्येयगुणवृद्धिः असंख्येयगुणवृद्धिः। यस्मादत्र हानिर्वृद्धिर्वायाश्चतस्रः।
वर्त्तते तस्मादत्र उत्कृष्टकालो नियतावक्ष्ये।। आसां तिसृणां वृद्धिहान्योरसंख्येयगुणलक्ष
णायाः उत्कृष्टकालो ऽन्तर्मुहूर्त्तप्रमाणं।। आद्यानां तिसृणां वृद्धीनां हा
नीनां च आवलिकाया असंख्येयभाग मात्रः। एतदुक्तं भवति तथाविधस्यायोगप्रम
नावतावद्धितान्योगस्थानान्यतिक्रम। समयसमयमस्मिन् परस्मिन्नसंख्येयगुणवृद्धियो
गस्थाने प्रवर्तते जीवः संख्येयगुणवृद्धिः। यस्तु नाम्नायपत्रामसमंमंदमंदतमत्वेनावर्त्तितः प्रतिसम
समयमपरस्मिन्नसंख्येयगुणहानौ योगस्थाने वर्त्तते सासंख्येयगुणहानिः सा च असंख्येयगुणवृ
द्धिः असंख्येयगुणहानिर्वा उत्कर्षतो ऽन्तर्मुहूर्त्तकालं यावन्निरंतरं भवति आद्यास्तिस्रो वृद्धयो
हानयो वा उत्कर्षत आवलिकाया असंख्येयभागमात्रं कालं अन्यस्थ तस्मैव तस्माद्ध्ययोगाद्विसमयौ।। ८
यावद्भवति स्यादेतत् कियंतं कालं यावदवस्थिता वृद्धिहानिरहितानां योगस्थानेष्ववस्थिताः।

प्यंतदिति व आवलिकासमासंख्यसमयअष्टप्रमाणमाह।। बारसर्वज्ञा अष्टामात्राना बड्गंतिसम
याणप्रथवनकत्रानाउप्राकासतिआकासोविवारआदिर्यस्याःसावष्टादिःसमयानामवस्थितिका
लनियामकानां वृद्धिः सा च तावद्यावद्यावदष्टकं इत्यष्टौ समया नाग निर्वक्रत्वास्तथा तावत्
प्यावतृष्टिकं सप्तवृत्तादिका वृद्धिः पर्याप्तनपत्त्यादिपर्याप्तसूक्ष्मनिगोदस्यजघन्यादियोगस्थाना।।
दारभ्य तावदष्टसमयायावदष्टकं ततः परं द्वातिःसापितावद्यावदुत्कृष्टयोगस्थानं एवं उत्कृष्टा
ःवस्थितिकालः एतदुक्तं भवति पर्याप्त।। सूक्ष्मनिगोदस्य सर्वाल्पवीर्यस्य सत्का जघन्यात्
योगस्थानादारभ्य क्रमेण यानि यो गस्थानानि श्रेण्यसंख्येयभागगतप्रदेशराशि
प्रमाणानि तान्युत्कर्षतश्चतुःसमयानि यावदवस्थितानि प्राप्यंते ततः परं यानि योगस्था
नानि श्रेण्यसंख्येयभागगतप्रदेशराशि प्रमाणानि तान्युत्कर्षतः पंचसमयानि ततः परं या
नि योगस्थानानि सर्वाण्येव प्रमाणानि तान्युत्कर्षतः षट्समयानि ततः परं यानि योगस्थाना
नि सर्वाण्येव प्रमाणानि तान्युत्कर्षतः सप्तसमयानि ततः पराणि यानि क्रमेण योगस्थानानि सर्वाणि स तं
ख्याकानि तान्युत्कर्षतः अष्टसमयानि ततः पराणि अनंतानि क्रमेण योगस्थानानि असंख्येय।।
नागगतप्रदेशराशिप्रमाणान्येव तान्युत्कर्षतः सप्तसमयानि यावदवस्थितानि प्राप्यंते तदनंतरं या।

का.प.टी.
८

योऽसंख्याकाच्चेवायोगस्थानानि उत्कर्षतः षट्समया इ ततोऽपि पराणि यावत्क्रमाणान्येवायो
गस्थानानि पंच समयानि एवं तावद्वाच्यं यावद्द्विसमानि अशीतिः संख्येयगततनानाद्वादशरात्रिप्रमाणा
नि उत्कर्षतो द्विसमयौ यावदवस्थितानि द्विपंचाशत् तदेवमुक्तमुत्कृष्टमवस्थानकालमानं सांप्र
तं जघन्यमवस्थानकालमानमाह॥ बाएगसमयं जहन्नबाणाणि एयाणि अट्ठसमयाणि उजरतेसंख
गुणियाणि समयसो अणवाणाणि सर्व पाउक्कस्स रूपाणां योगस्थानानां जघन्यत एकस
मयं यावदवस्थानं तथाचाऽयपर्या सप्तस्मनिगोदयोगयानि असंख्येयानि योगस्था
नानि सर्वमत्र कालनियमानि त घांजघन्यत उत्कर्षतो वा एकं समयं यावदवस्था
नं यतः सर्वा अपर्याप्ताः पर्याप्ता वस्था। यां वर्तमानाः प्रतिसमयमसंख्येयगुणरूपयोगा॥
वृद्धा वर्द्धते तत स्तद्योगस्थानानामजघ॥ योत्कृष्टकालसकाम वसमं यावदवस्थानं त। दवत्र्का
समयत्रमरूपणां सा प्रतं च्चातपाम वच्चतराद्विसमयानामयोगस्थानानामल्पबहुत्वमाह वाणा॥
णीत्यादि अष्टसामायिकानि स्थानानि योगस्थानानि शेषसमसामायिकादियोगस्थानानि प्रतीत्य
स्तोकान्येव प्राप्यंत इतिकृत्वा तत्स्तोः शेषीकाम समयसमसंख्येयगुणानि प्रत्यवलिरस्तापान्यपार्श्ववर्त्ती ८
निसप्तसामायिकानि अल्पतरस्थितिकत्वात्स्वस्थाने तुलानि व्यत्यये अपि परस्परं तुल्यानि ततोऽप्यसं

ख्येयगुणानि उभयपार्श्ववर्त्तीनि षट्सामायिकानि स्वस्थाने उपरस्परं तुल्यानि ततोऽप्यसंख्येय॥
गुणानि पंचसामायिकानि उभयपार्श्ववर्त्तीनि स्वस्थाने उपरस्परं तुल्यानि ततोऽप्यसंख्येयगुणानि
चतुःसामायिकानि स्वस्थाने उपरस्परं तुल्यानि ततोऽप्यसंख्येयगुणानि त्रिसामायिकानि ततोऽप्यसं
ख्येयगुणानि द्विसामायिकानि समयसो अणवाणाणि समयाः संख्येयसमयाः समायन्ताः अष्टस
मायिकेभ्योऽप्य तिरिक्तानि सप्तसामायिका दीनि स्थानानि योगस्थानानि तादवत्र्कंच चतुरादि
समयानां योगस्थानानामल्पबहुत्वं संत तंतत्रयोगस्थानेषु वर्तमानानां सूक्ष्मबादरैकें
द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञि संज्ञिपंचेन्द्रियाणां पर्याप्तापर्याप्तानां जघन्यो
त्कृष्टयोगविषयमल्पबहुत्वमभिधित्सुः॥ सुराहा॥ सुहुमबादर जोगा सादाराणेसुजहणा
उमससमयंमि वारेयि पियतिरिच्चउरमणसन्न पज्जत्तानजहा ईहासंख्येयगुणा इति गाथा
तासंबध्याति साधारणस्य सूक्ष्मस्यलब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगः सर्व
स्तोकः ततोबादरस्य केन्द्रियस्य लब्ध्यपर्याप्तस्य प्रथमसमये वर्तमानस्य जघन्यो योगः संख्येय
गुणः ततो द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगः संख्येयगुणः तत
स्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणस्ततश्चतुरिन्द्रि

का०टी०। यस्य लब्ध्यपर्याप्तकस्य प्रथमसमयवर्त्तमानस्य जघन्यायोगाः संख्येयगुणाः॥ ततः संज्ञिपंचेंद्रि
२० यस्य लब्ध्यपर्याप्तकस्य प्रथमसमयवर्त्तमानस्य जघन्यायोगाः संख्येयगुणाः। ततः संज्ञिपंचेंद्रि
यस्य लब्ध्यपर्याप्तकस्य प्रथमसमयवर्त्तमानस्य जघन्योयोगाः संख्येयगुणाः। ७ आइउउपाकामो
मिं पघन्नजदन्नागयारयकमा आकामजदन्नियाए असमन्नियाए असंखगुणाणि आदिद्विकमपर्याप्त
सूक्ष्मबादरावं द्वियलक्षणतस्या उत्कृष्टायो गाः परिपाद्या असंख्येयगुणा वक्रव्याः तद्यथा ल॥
ब्ध्यपर्याप्तकसंज्ञिपंचेंद्रियजघन्ययोगा त्सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्योत्कृष्टा।
द्योगाः संख्येयगुणाः। ततो द्विबादरैकें द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टः संख्येय॥ ×योग×
गुणः। अस्मिं पघन्नजदन्नागयारयकमा "अनयोः सूक्ष्मबादरैकेंद्रिययोः पर्याप्तयोर्ज
घन्यः इतरस्योत्कृष्टः क्रमात्कामण असंख्य यगुणा वक्तव्याः तद्यथा लब्ध्यपर्याप्तकबादरैकें
द्रियोत्कृष्टयोगात् सूक्ष्मनिगोदस्य पर्याप्तस्य जघन्ययोगाः संख्येयगुणः। ततो बादरैकेंद्रि
यस्य पर्याप्तकस्य जघन्ययोगाः संख्येयगुणः। ततः सूक्ष्मनिगोदस्य पर्याप्तस्योत्कृष्टयोगाः सं।
ख्येयगुणः। ततो बादरैकेंद्रियस्य पर्याप्तस्योत्कृष्टयोगाः संख्येयगुणः। आकामजदन्निय॥ १०
ए असमन्नियाए असंखगुणाणि अमनापर्याप्ताद्वींद्रियादितस्मिंन्नुत्कृष्टः इतरस्मिन्नपर्याप्त।

द्वींद्रियादेर्जघन्यः इतरस्योत्कृष्टः परिपाट्या असंख्येयगुणा वक्तव्याः तद्यथा पर्याप्तकबादरैकें
द्रियोत्कृष्टयोगात् द्वींद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टयोगा असंख्येयगुणा। ततस्त्रींद्रियस्य।
लब्ध्यपर्याप्तकस्योत्कृष्टयोगा संख्येयगुणाः। ततश्चतुरिंद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टयो
गाः संख्येयगुणाः। ततोऽसंज्ञिपंचेंद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टयोगाः संख्येयगुणाः। ततो
पि संज्ञिपंचेंद्रियस्य लब्ध्यपर्याप्तकस्योत्कृ ष्टयोगाः संख्येयगुणाः। ततो द्वींद्रियस्य पर्याप्तक
स्य जघन्योयोगाः संख्येयगुणः। ततः त्रींद्रियस्य पर्याप्तकस्य जघन्योयोगाः संख्ये।
यगुणः। ततश्चतुरिंद्रियस्य पर्याप्तक स्य जघन्यो योगाः संख्येयगुणः। ततोऽसंज्ञि
पंचेंद्रियस्य पर्याप्तकस्य जघन्यो यो गाः संख्येयगुणः। ततः संज्ञिपंचेंद्रियस्य पर्याप्त।
कस्य जघन्यो योगाः संख्येयगुणः। ततो द्वींद्रियस्य पर्याप्तकस्योत्कृष्टो योगाः संख्येयगुण
। ततस्त्रींद्रियस्य पर्याप्तकस्योत्कृष्टयोगाः संख्येयगुणः। ततोऽपि चतुरिंद्रियस्य पर्याप्तकस्यो
त्कृष्टयोगाः संख्येयगुणः। पर्याप्तकावस्थासर्वत्रापि करणपर्याप्ता वदितव्या ७ अमणोपत्थगे
विछाणागन्निगयतइयतउगाउ कमासो असंखगुणिउ सासऊयाजाएवे आकामा अमणत्ति
अमना असंज्ञिपर्याप्तचतुरिंद्रियाद्युत्कृष्टयोगात् असंज्ञिपंचेंद्रियपर्याप्तकस्योत्कृष्टयोगाः सं।

कर्म्मग्रंटी॥ ११

संख्येयगुणाः। ततोऽनुत्तरोपपातिनो देवानामुत्कृष्टयोगाः संख्येयगुणाः। ततो ग्रैवेयकाणां देवानामुत्कृष्टयोगाः संख्येयगुणाः। ततो भोगभूमिजानां तिर्यङ्मनुष्याणामुत्कृष्टयोगाः संख्येयगुणाः। ततो आहारकशरीरिणामुत्कृष्टयोगाः संख्येयगुणाः। ततः शेषाणां देवनारकतिर्यङ्मनुष्याणामुत्कृष्टयोगाः संख्येयगुणाः। अयं संख्येयगुणकारश्च सूक्ष्मक्षेत्रपल्योपमासंख्येयभागगतस्तद्वदवगन्तव्यः। इयं तु गाथा ... तत्रौदारिकशरीरं तावदेव। ... पंचयोगान्यूनपर्याप्तकाः ... विपरिणमय्य ... यंचतस्रः ... पंचत्रि पंचशरीराणि परिणमयति अपदारिकादिपंचशरीरा ... परिणमयति ... कथं ... तदुत्कृष्टयोगो वर्त्तमानः स्तोकान् पुद्गलस्कंधान् गृह्णाति मध्यमे मध्यमान् उत्कृष्टे चोत्कृष्टान् ... ११

कृष्टयोगो वर्त्तमानः प्रभूतान् पुद्गलस्कंधान् गृह्णाति तथा नाम ... पुद्गलस्कंधान् गृह्णाति ... तिर्यञ्चः ...

४५ ... पुद्गलस्कंधान् गृह्णाति ... तत्र ... पुद्गलान् ... मा॰ चू॰

पुद्गलवर्गणाः ... परमाणु ... संख्येयगुणाः ... णु॰

... परमाणुवर्गणा ... एकैकपरमाणूनां ... संख्याताः परमाणवः ... अनन्तानन्तपरमाणुभिः ... वर्गणा ... परमाणुवर्गणाः ... एकैकस्मिन् परमाणौ वर्गणा ... परमाणुवर्गणा ...

मुदायः परमाणुवर्गणेत्यादयस्तेन बाह्याः सति असंख्येनागं तुल वर्गादो इति विज्ञेयेत् एकैकपरमाणूनां
सर्वलोकगतत्वात्तेन बाह्याः परमाणवो समुदाया द्विप्रदेशस्कंधवर्गणा त्र्यणुकपरमाणूनां समु
दायस्त्रिप्रदेशस्कंधवर्गणा एवं संख्येयपरमाणूनां समुदायश्चतुःप्रदेशकस्कंधवर्गणा एवं तावद्वाच्यं
यावत्संख्येया वर्गणा भवंति असंख्यातानां च परमाणूनां समुदायरूपा असंख्येयवर्गणा वाच्या अ
संख्यातस्यासंख्यातानेकात्मकत्वात् ततानंतानां परमाणूनां समुदायरूपा अनंता वर्गणा वाच्या
अनंतानंतात्मकत्वात् एताश्च सूजतश्चा। इत्यं सर्वेषामपि परमाणुतया स्थूलप
रिणामत्वेन वा ग्रहणप्रायोग्याः अनं तानंतपरमाणूनां समुदायरूपाः काश्चित् ग्र
हणप्रायोग्याः काश्चिदग्रहणप्रायोग्याः॥ सूत्रानंतव्यन्योनंतगुणाः सिद्धानामनंततमभागकल्प
नीयपरमाणवस्समुदायात्मकाः स्कंधाश्च औदारिकवर्गणा किञ्चादरेण औदारिकग्रहणमित्यर्थः औ
दारिकशरीरस्य ग्रहणप्रायोग्यावर्गणा औदारिकवर्गणा भवंति ग्रहणप्रायोग्यावर्गणा भवंतान्यर्थः॥
किंविषया इत्याह आहतिसिद्ध इति औदारिकवैक्रियाहारकरूपतनुत्रयविषयग्रहणप्रायोग्यावर्ग
णा अग्रहणांतरिताः अग्रहणप्रायोग्यावर्गणांतरिताः तथाहि तैजसभाषाप्राणापानमनःकर्मणां च विष १२
ये अग्रहणप्रायोग्यवर्गणांतरिताः ग्रहणप्रायोग्यावर्गणा भवंति तथाहि अनंतानंतगुणसिद्धानंततमभागक

ल्पपरमाणुसमुदायरूपा वर्गणा औदारिकशरीरनिष्पादनाय ग्रहणप्रायोग्या भवंति सा च जघन्या त
त एकपरमाण्वधिकस्कंधरूपा द्वितीया ग्रहणप्रायोग्यावर्गणा द्विपरमाण्वधिकस्कंधरूपा तृतीया ग्रहण
प्रायोग्यावर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा वर्गणास्तावद्वाच्या यावदुत्कृष्टा औदारिकशरी
रग्रहणप्रायोग्यवर्गणा जघन्यायाश्च वर्गणायाः सकाशादुत्कृष्टवर्गणा विशेषाधिकाः विशेषश्च तस्या
अ श्च वर्गणाया अनंततमोभागः औदारिकशरीरग्रहणप्रायोग्योत्कृष्टवर्गणोपर्येकैकपरमाण्व
धिकस्कंधरूपावर्गणा अग्रहणप्रायोग्या। सा जघन्या ततो द्विपरमाण्वधिकस्कंधरूपा द्विती
या अग्रहणप्रायोग्यावर्गणा एवमेकै कपरमाण्वधिकस्कंधरूपा वर्गणास्तावद्वाच्या या
वदुत्कृष्टा अग्रहणप्रायोग्यावर्गणा भवंति जघन्यायाश्च वर्गणायाः सकाशादुत्कृष्टवर्गणा
अनंतगुणा गुणकारश्चानंतानंतगुणसिद्ध। नंतभागकल्पाः शिक्षमाणा दृष्टव्याः एतासां चाग्रह
णप्रायोग्यता औदारिकं प्रति बहुतरपरमाणुनिष्पन्नत्वात् सूक्ष्मपरिणामत्वाद्वा वेदितव्या। वैक्रियं प्रति तु ता
स्वल्पपरमाण्वात्मकत्वात् स्थूलपरिणामपरिणतत्वाच्चावसेया एवमुत्तरत्रापि भावना कार्या अग्रहण
प्रायोग्योत्कृष्टवर्गणोपर्येकैकपरमाण्वधिकस्कंधरूपा वर्गणा वैक्रियशरीरप्रायोग्या जघन्या
वर्गणा ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया वैक्रियशरीरस्य ग्रहणप्रायोग्या वर्गणा एवमेकै।

कपरमाण्वधिकस्कंधरूपा वर्गणा वैक्रियशरीरविषये ग्रहणयोग्या, तावद्वक्तव्या यावदुत्कृष्टा ग्रह-
णयोग्या वर्गणा भवति, जघन्यायाश्चोत्कृष्टा विशेषाधिका, विशेषश्च तस्या एव जघन्याया वर्गणा-
या अनंततमो भागः। वैक्रियशरीरस्योत्कृष्टवर्गणोपरि एकपरमाण्वधिकस्कंधरूपा जघन्याऽग्रह-
णयोग्या वर्गणा, ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीयाऽग्रहणयोग्या वर्गणा, एवमेकै-
कपरमाण्वधिकस्कंधरूपा अग्रहणयोग्या॥ ग्या वर्गणास्तावद्वक्तव्या यावदुत्कृष्टाऽग्रहणयो-
ग्या वर्गणा, जघन्यायाश्चोत्कृष्टा वर्गणा॥ अनंतगुणा, गुणकारश्चाभव्यानंतगुणसिद्धानं-
तभागकल्पराशिप्रमाणो द्रष्टव्यः, तत उत्कृष्टाग्रहणयोग्यवर्गणोपरि एकपर-
माण्वधिकस्कंधरूपा वर्गणा आहारकश- रीरयोग्या, जघन्या वर्गणा, ततो द्विपरमाण्वधि-
कस्कंधरूपा द्वितीया आहारकशरीरविष॥ ये ग्रहणयोग्या वर्गणा, एवमेकैकपरमाण्वधिक-
स्कंधरूपा आहारकशरीरविषये ग्रहणयोग्या वर्गणास्तावद्वक्तव्या यावदुत्कृष्टा ग्रहणयोग्या
वर्गणा भवति, जघन्यायाश्चोत्कृष्टा [illegible] विशेषाधिका, विशेषश्च तस्या एव जघन्याया वर्गणा-
या अनंततमो भागः। आहारकशरीरयोग्योत्कृष्टवर्गणोपरि एकपरमाण्वधिकस्कंधरूपा अ- १३
ग्रहणयोग्या जघन्या वर्गणा, ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया अग्रहणयोग्या वर्गणा, एव-

मेकैकपरमाण्वधिकस्कंधरूपा अग्रहणयोग्या वर्गणाः तावद्वक्तव्या यावदुत्कृष्टा अग्रहणयो-
ग्या वर्गणा भवति, जघन्यायाश्चोत्कृष्टाऽनंतगुणा, गुणकारश्चाभव्यानंतगुणसिद्धानंतभागक-
ल्पराशिप्रमाणो द्रष्टव्यः। इह च यद्यप्यौदारिकवैक्रियाहारकशरीरयोग्याणां वर्गणाना-
मपांतराले अग्रहणवर्गणा न संभवंति, परं जिनभद्रगणिक्षमाश्रमणादिभिर्लिख्यंत इति तन्मतानान्ना॥
आहारकशरीरग्रहणयोग्योत्कृष्टवर्गणो- परि एकपरमाण्वधिकस्कंधरूपा वर्गणा ते-
जसशरीरयोग्या जघन्या वर्गणा भवति, त- तो द्विपरमाण्वधिकस्कंधरूपा द्वितीया तैजसशरी-
रयोग्या वर्गणा, एवमेकैकपरमाण्व- धिकस्कंधरूपा तैजसशरीरविषये ग्रहणयो-
ग्या वर्गणाः तावद्वक्तव्या यावदुत्कृष्टा ग्रह- णयोग्या वर्गणा भवति, जघन्यायाश्चोत्कृष्टा
विशेषाधिका, विशेषश्च तस्या एव जघन्याया अनं- ततमो भागः। तैजसशरीरयोग्योत्कृष्टवर्गणोप-
रि एकपरमाण्वधिकस्कंधरूपा जघन्या अग्रहणयोग्या वर्गणा, ततो द्विपरमाण्वधिकस्कंध-
रूपा द्वितीया अग्रहणयोग्या वर्गणा, एवमेकैकपरमाण्वधिकस्कंधरूपा अग्रहणयोग्या
वर्गणाः तावद्वक्तव्या यावदुत्कृष्टा अग्रहणयोग्या वर्गणा, जघन्यायाश्चोत्कृष्टाऽनंतगुणा, गुणकार-
श्चाभव्यानंतगुणसिद्धानंतभागकल्पराशिप्रमाणो द्रष्टव्यः। अग्रहणयोग्योत्कृष्टवर्गणोपरि एकपर-

कर्मा०प्र० १४ एकपरमाण्वधिकस्कंधरूपा जघन्या ता भाषाप्रायोग्या यानि उत्कलद्रव्याणि गृहीत्वा जंतवः सत्यादिभाषा-
रूपतया परिणमय्यालंब्य च विसृजंति तानि भाषाप्रायोग्या वर्गणा ततो द्विपरमाण्वधिकस्कंधरूपा द्विती-
या भाषाप्रायोग्या वर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा प्रायोग्या वर्गणा ततो द्विपरमाण्वधिक-
स्कंधरूपा भाषाप्रायोग्या वर्गणा तावद्वक्तव्या यावदुत्कृष्टा भाषाप्रायोग्या वर्गणा भवति जघन्या-
याश्च उत्कृष्टा विशेषाधिका विशेषश्च तस्या एव जघन्याया वर्गणाया अनंततमो भागः उत्कृष्टभाषा-
प्रायोग्यवर्गणाया उपर्येकपरमाण्वधि- कस्कंधरूपा जघन्याऽग्रहणप्रायोग्या वर्ग-
णा ततो द्विपरमाण्वधिकस्कंधरूपा। द्वितीयाऽग्रहणप्रायोग्या वर्गणा एवमेकै-
कपरमाण्वधिकस्कंधरूपा अग्रहणप्रायो- ग्या वर्गणा तावद्वक्तव्या यावदुत्कृष्टाऽग्रहणप्रा-
योग्या वर्गणा जघन्याया उत्कृष्टा अनंतगुणा। गुणकारश्चाभव्यानंतगुणसिद्धानंततमभागकल्पराशि-
प्रमाणो द्रष्टव्यः अग्रहणप्रायोग्योत्कृष्टवर्गणाया उपर्येकपरमाण्वधिकस्कंधरूपा जघन्या प्राणा-
पानयोर्वर्गणा यानि उत्कलद्रव्याणि गृहीत्वा जंतवः प्राणापानरूपतया परिणमय्यालंब्य च विसृजंति
तानि प्राणापानयोग्या वर्गणा ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया प्राणापानयोग्या वर्गणा एव- १४
मेकैकपरमाण्वधिकस्कंधरूपा प्राणापानयोग्या वर्गणा तावद्वक्तव्या यावदुत्कृष्टा प्राणापानयो-

---

ग्या वर्गणा भवति जघन्यायाश्च उत्कृष्टा विशेषाधिका विशेषश्च तस्या एव जघन्याया अनंततमो भागः
प्राणापानयोग्योत्कृष्टवर्गणाया उपर्येकपरमाण्वधिकस्कंधरूपा जघन्याऽग्रहणप्रायोग्या व-
कृ र्गणा ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीयाऽग्रहणप्रायोग्या वर्गणा एवमेकैकपरमाण्वधिक-
स्कंधरूपा अग्रहणप्रायोग्या वर्गणा तावद्वक्तव्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा भवति जघ-
न्यायाश्च उत्कृष्टाऽनंतगुणा गुणकारश्चाभव्या- नंतगुणसिद्धानंततमभागकल्पराशिप्रमाणो द्रष्टव्यः।
ततोऽग्रहणप्रायोग्योत्कृष्टवर्गणाया उप- र्येकपरमाण्वधिकस्कंधरूपा मनःप्रायोग्या॥
जघन्या वर्गणा इत्यर्थः यानि उत्कलद्रव्या॥ णि जंतवः सत्यादिमनोरूपतया परिणमय्या-
लंब्य च विसृजंतीति मनःप्रायोग्या वर्ग- णा ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया म-
नःप्रायोग्या वर्गणा एवमेकैकपरमाण्वधि- कस्कंधरूपा मनःप्रायोग्या वर्गणा तावद्वक्तव्या या॥
वदुत्कृष्टा मनःप्रायोग्या वर्गणा भवति जघन्यायाश्च उत्कृष्टा विशेषाधिका विशेषश्च तस्या एव जघन्या-
या वर्गणाया अनंततमो भागः तत उत्कृष्टमनःप्रायोग्यवर्गणाया उपर्येकपरमाण्वधिकस्कंधरूपा।
वर्गणा जघन्याऽग्रहणप्रायोग्या वर्गणा ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीयाऽग्रहणप्रायो-
ग्या वर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा अग्रहणप्रायोग्या वर्गणा तावद्वक्तव्या यावदुत्कृष्टा

अथ ग्रहणप्रायोग्यवर्गणा जघन्याया अप्युत्कृष्टा अनंतगुणा गुणकारश्चाभव्यानंतगुणसिद्धानंतभागक-
ल्पराशिप्रमाणो द्रष्टव्यः ततो ग्रहणप्रायोग्योत्कृष्टवर्गणोपर्येकपरमाण्वधिकस्कंधरूपा क-
र्मप्रायोग्या जघन्या वर्गणा द्रष्टव्या यानि जीवद्रव्याणि अंतरज्ञानावरणादिरूपतया परिणमयं-
ति तानि कर्मप्रायोग्या वर्गणा ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया कर्मप्रायोग्या वर्गणा।
एवमेकैकपरमाण्वधिकस्कंधरूपाः क- र्मप्रायोग्या वर्गणा तावद्वक्तव्या यावदुत्कृष्टा कर्म-
प्रायोग्या वर्गणा भवति जघन्यायाश्चो- त्कृष्टा विशेषाधिका विशेषश्चानंतस्तस्याश्च जघन्या-
या वर्गणाया अनंततमो भागस्तत्प्र- माणमित्यत्र च शब्दस्यानुक्तसमुच्चयार्थत्वा-
दुत्कृष्टाया वर्गणानंतरमग्रहणवर्गणांत- रिताः प्राणापानवर्गणा द्रष्टव्याः ता अपि जघन्यादि-
वत्कार्मणवद्वक्तव्याः इदानीमे- तासामौदारिकादिप्रायोग्यवर्गणानां वर्णादि-
निरूपयंति तत्रौदारिकशरीरप्रायोग्या वर्गणा अनंतानंतपरमाण्वात्मकाः पंचवर्णा द्विगंधाः पंचर-
सा अष्टस्पर्शाः सर्वे वैक्रियाहारकशरीरप्रायोग्या अपि वर्गणा द्रष्टव्याः तैजसशरीरप्रायोग्या वर्ग-
णाः पंचवर्णा द्विगंधाः पंचरसाश्चतुःस्पर्शाः तत्र मृदुलघुस्पर्शौ अवस्थितौ अन्यौ तु द्वौ स्पर्शौ १५
स्निग्धोष्णौ स्निग्धशीतौ रूक्षोष्णौ रूक्षशीतौ वा एवं भाषाप्राणापानमनःकर्मप्रायोग्या अपि वर्गणा।

द्रष्टव्याः तत्रौदारिकवर्गणाः प्रदेशार्थतया सर्वस्तोकाः ताभ्यो वैक्रियशरीरप्रायोग्या वर्गणा अनंत-
गुणाः ताभ्य आहारकशरीरप्रायोग्या वर्गणा अनंतगुणाः ताभ्योपि तैजसशरीरप्रायोग्या वर्गणा अनंतगु-
णाः एवं भाषाप्राणापानमनःकर्मप्रायोग्या अपि वर्गणा यथोत्तरमनंतगुणा वाच्याः ध्रुवअध्रुवस्यादिक-
र्मप्रायोग्योत्कृष्टवर्गणानंतरं ध्रुवाचित्तद्रव्यवर्गणास्तदनंतरं अध्रुवाचित्तवर्गणाः ततः शून्याश्चतस्रो व-
र्गणा ध्रुवशून्यवर्गणाः तासां च चतसृणां ध्रुवशू- न्यवर्गणानामंतरे उपरिष्टात् प्रत्येकतनु बादर-
सूक्ष्मनिगोदमहास्कंधवर्गणा यथासंख्यं भवंति तद्यथा प्रथमध्रुवशून्यवर्गणाया उपरि।
प्रत्येकशरीरवर्गणा द्वितीयध्रुवशून्य- वर्गणाया उपरि बादरनिगोदवर्गणा तृतीय-
व ध्रुववर्गणाया उपरि सूक्ष्मनिगोदवर्गणा चतु- र्थध्रुवशून्यवर्गणाया उपरि महास्कंधवर्गणा तत्र। फ्रा
कर्मप्रायोग्योत्कृष्टवर्गणानंतरं एकपरमा- ण्वधिकस्कंधरूपा जघन्या ध्रुवाचित्तद्रव्यवर्गणा
ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया ध्रुवाचित्तद्रव्यवर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा
ध्रुवाचित्तद्रव्यवर्गणाः तावद्वक्तव्या यावदुत्कृष्टा ध्रुवाचित्तद्रव्यवर्गणा ध्रुवाचित्तद्रव्यवर्गणा नाम यास्स-
र्वदैव लोके प्राप्यंते तथाप्येतासां मध्यादन्या उत्पद्यंते अन्याश्च विनश्यंति न पुनरेताभिः कदाचना-
पि लोको विरहितो भवति अध्रुवाचित्तं संज्ञा विनकदाचनाप्यग्रहणादेवासंयं जीवसंबंधाद्धि सचित्तम्

पिकर्मयोग्येभ्यो यावदौदारिकादिशरीराणामिति जघन्यायाः अग्रहणवर्गणायाः सकाशादुत्कृष्टा वर्गणा अनंत
गुणा गुणाकारश्च सर्वजीवानंतगुणराशिप्रमाणो द्रष्टव्यः ततः एकपरमाण्वधिकस्कंधरूपा जघन्या
ध्रुवाचित्तद्रव्यवर्गणा अनंतगुणा गुणाकारश्च सर्वजीवानंतगुणराशिप्रमाणो द्रष्टव्यः ततः एकप
रमाण्वधिकस्कंधरूपा जघन्या अध्रुवाचित्तद्रव्यवर्गणा ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया अ
ध्रुवाचित्तद्रव्यवर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा अध्रुवाचित्तद्रव्यवर्गणा तावद्वाच्या
यावदुत्कृष्टा अध्रुवाचित्तद्रव्यवर्गणा भवति अध्रुवाचित्तद्रव्यवर्गणा नाम यासां मध्ये का
×कदाचिन्न भवति× अपि वर्गणा कदाचिल्लोके न वर्तते। एवैतासां सांतरनिरंतराध्रुवत्वात् जघन्याया
अध्रुववर्गणायाः सकाशादुत्कृष्टा वर्गणा अनंतगुणा गुणाकारश्च सर्वजीवानंतगुणराशिप्र
माणो द्रष्टव्यः ततः एकपरमाण्वधिकस्कंधरूपा जघन्या प्रथमध्रुवशून्यवर्गणा ततो द्विपरमाण्व
धिकस्कंधरूपा द्वितीया प्रथमध्रुवशून्यवर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा प्रथमध्रुवशून्य
वर्गणा तावद्वक्तव्या यावदुत्कृष्टा प्रथमध्रुवशून्यवर्गणा भवति ध्रुवशून्यवर्गणा नाम या कदाचना
पि लोके न भवंति केवलमुपरितनवर्गणानां बाहुल्यपरिज्ञानार्थं या उपरि प्रत्येकशरीरवर्गणा। १६
द्वितीयध्रुवशून्यवर्गणाया उपरि बादरनिगोदवर्गणा तृतीयध्रुवशून्यवर्गणाया उपरि सूक्ष्मनिगो

दवर्गणा अत्र सर्वध्रुवशून्यप्ररूपणामात्रमेव क्रियते जघन्याया वर्गणायाः सकाशादुत्कृष्टा वर्गणा अनं
तगुणा गुणाकारश्च सर्वजीवानंतगुणराशिप्रमाणो द्रष्टव्यः ततः एकपरमाण्वधिकस्कंधरूपा जघन्या प्रत्ये
कशरीरिद्रव्यवर्गणा अथ कथं प्रत्येकशरीरिद्रव्यवर्गणानामत्वमुच्यते प्रत्येकशरीरिणां यथासंभव
मौदारिकवैक्रियाहारकतैजसकार्मणशरीरनामकर्मोदयप्रत्ययं विस्रसापरिणामेनापच
यमापन्नाः सर्वजीवानंतगुणाः पुद्गलास्तेष्व। प्रत्येकशरीरिद्रव्यवर्गणा ततः एकपरमाण्वधिकस्कं
धरूपा द्वितीया प्रत्येकशरीरिद्रव्यवर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा प्रत्येक
शरीरिद्रव्यवर्गणास्तावद्वाच्या यावदुत्कृष्टा प्रत्येकशरीरिद्रव्यवर्गणा भवति जघन्या
याश्चोत्कृष्टा असंख्येयगुणा गुणाकारश्च सूक्ष्मक्षेत्रपल्योपमासंख्येयभागलक्षणः क
थमेतदवसीयते इति चेदुच्यते इह सर्वोपि कर्मप्रदेशाग्रोपचयापचयाद्भवति योगोपचयाप
चयाविति वचनात् ततो जघन्ययोगे सति जघन्यः कर्मप्रदेशाग्रोपचयो भवति उत्कृष्टयोगे चोत्कृष्टो जघन्या
च्च योगस्थानादुत्कृष्टयोगस्थानं सूक्ष्मक्षेत्रपल्योपमासंख्येयभागगुणितमवसीयते नाधिकं त
तः कर्मप्रदेशाग्रोपचयादपि जघन्यादुत्कृष्टः कर्मप्रदेशाग्रोपचयः सूक्ष्मक्षेत्रपल्योपमासंख्येयभागगु
णित एवेति नाधिकः तदाश्रिता च प्रत्येकशरीरिद्रव्यवर्गणा ततः प्रत्येकशरीरिद्रव्यवर्गणाया उत्कृष्टाया

कर्मप्र० प्रत्येकशरीरद्रव्यवर्गणाया उत्कृष्टाया उपरि पल्योपमासंख्येयभागगुणितेन वर्तितो।
१७ नंतरमेकपरमाण्वधिकस्कंधरूपा जघन्या द्वितीयध्रुवशून्यवर्गणा ततो द्विपरमाण्वधिकस्कंधरू।
पा द्वितीयध्रुवशून्यवर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा द्वितीयध्रुवशून्यवर्गणास्तावद्वक्त॥
व्या यावदुत्कृष्टा द्वितीयध्रुवशून्यवर्गणा जघन्यायाश्चोत्कृष्टा असंख्येयगुणा गुणकारश्चासंख्येयाः
लोकाकाशप्रदेशराशिप्रमाणा द्रष्टव्याः ततएकपरमाण्वधिकस्कंधरूपा जघन्या बादरनिगोद।
वर्गणा अथ के ते बादरनिगोदद्रव्यवर्गणा नामेत्युच्यते बादरनिगोदाः बादरनिगोदजीवानामौ।
दारिकतैजसकार्मणशरीरनामकर्म प्रत्येकाः सर्वजीवानंतगुणाः उक्तलाविस्र
सापरिणामेनापरिवयमानाः तिबादरनि॥ गोदद्रव्यवर्गणा तत्र बादरनिगोदजीवानां य।
द्यपि कर्मविक्रियकालविक्रियाद्वारकशरीरनामकर्मणी अपि संभवतः तथापि ते अप्रम
मु मत्यादवनिरंतरंबध्यमानत्वादल्पतमपरमाणुपेतत्वाच्च न विवक्षिते ततो द्विपरमाण्वधिकस्कंधरूपा वर्गणा
द्वितीया बादरनिगोदद्रव्यवर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा वर्गणा तावद्वक्तव्या याव।
दुत्कृष्टा बादरनिगोदद्रव्यवर्गणा जघन्यायाश्चोत्कृष्टा असंख्येयगुणा गुणकारश्चाद्रपल्योपमासंख्ये १७
यभागलक्षणः अत्र युक्तिः प्रत्येकशरीरद्रव्यवर्गणायामिव परिभावनीया ततएकपरमाण्वधिकस्कं।
या

धरूपा जघन्या तृतीयध्रुवशून्यवर्गणा ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया तृतीयध्रुवशून्या
वर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा वर्गणास्तावद्वक्तव्या यावदुत्कृष्टा तृतीयध्रुवशून्यवर्गणा
भवति जघन्यायाश्चोत्कृष्टासंख्येयगुणा गुणकारश्च अंगुलमात्रक्षेत्रप्रदेशराशेरावलिकाया असं
ख्येयतमभागगतयावंतः समयास्तावंति वर्गमूलानि उत्पाद्य तेषां चावरमस्य वर्गमूलस्यासंख्येयत
मभागगतयावंत आकाशप्रदेशास्तावत्प्रमाणो द्रष्टव्यः ततएकपरमाण्वधिकस्कंधरूपा वर्गणा ज।
घन्या सूक्ष्मनिगोदद्रव्यवर्गणा सा च सूक्ष्मनि। गोदवर्गणा बादरनिगोदवन्निगोदद्रव्यवर्गणा
वद्विशेषणावगंतव्या यावदुत्कृष्टा ज। घन्यायाश्चोत्कृष्टा असंख्येयगुणा गुणः गु
णकारश्चावलिकाया असंख्येयतम॥ भागगतयावंतः समयास्तावत्प्रमाणो द्रष्टव्यः य।
तः सूक्ष्मनिगोदजीवानां जघन्ये योगस्थाने उत्कृष्टे योगस्थाने चावलिकासंख्येयभागगु।
णितमेव प्राप्यते नाधिकाये योगाधीनाच कर्मप्रदेशोपचयः द्विस्तदधीनाच सूक्ष्मनिगोदवर्गणे॥
ति ततएकपरमाण्वधिकस्कंधरूपा वर्गणा जघन्या चतुर्थध्रुवशून्यवर्गणा ततो द्विपरमाण्वधिकस्कं
धरूपा चतुर्थध्रुवशून्यवर्गणा एवमेकैकपरमाण्वधिकस्कंधरूपा वर्गणास्तावद्वक्तव्या यावदुत्कृष्टा
चतुर्थध्रुवशून्यवर्गणा जघन्यायाश्चोत्कृष्टा असंख्येयगुणा गुणकारश्चप्रतरासंख्येयभागवर्तिसंख्ये

कर्म॰ टी॰ यावल्लोकाकाशप्रदेशराशिप्रमाणा उत्कृष्टाः । तत एकपरमाण्वधिकस्कंधरूपा वर्गणा जघन्या म-
१८ हास्कंधवर्गणा महास्कंधवर्गणा नाम । ये टंकशैलस्कंधा विस्रसापरिणामेन टंककूटपर्वतादिसमाश्रि-
ताः । ततो द्विपरमाण्वधिकस्कंधरूपा द्वितीया महास्कंधवर्गणा एवमेकैकपरमाण्वधिकस्कंधवर्गणा-
स्तावद्वक्तव्या यावदुत्कृष्टा भवति जघन्यायाश्चोत्कृष्टा असंख्येयगुणा गुणकारश्चात्र पल्योपमासंख्येय-
३ भागप्रमितो द्रष्टव्यः । इमाश्च महास्कंधवर्गणा यदा त्रसकाया अल्पा भवंति तदा स्तोकाः प्राप्यंते ।
यदा च बहवस्तदा बह्व्यः इति वृद्धसंप्रदायः । एताश्च परमाणुवर्गणाद्या महास्कंधवर्गणापर्यं-
वसानाः गुणनिष्पन्नसनामत्वेन गुणाः ॥ स्वानिष्पन्नं स्वस्वकार्यं नाम यासां ता गुणनि-
ष्पन्नस्वनामानः तथाहि एकैकपरमाणवः ॥ परमाणुवर्गणाद्याः परमाणोर्वर्गणा द्विपर-
माणुवर्गणा इत्येवं नामाद्या बोधनीया इति तद्व । तथा असंख्येयावगाहादयस्ता सर्वासामपि व-
र्गणानामवगाहोऽङ्गुलस्यासंख्येयभागः तथाहि एता वर्गणाः सर्वा अपि सर्वोत्कृष्टमहास्कंधवर्गणा-
पर्यवसाना प्रत्येकमङ्गुलासंख्येयभागमात्रे प्रदेशे अवगाहंते केवलं अपि तु अल्पकाः केचित् सत्यः(?) अङ्गुला-
७ संख्येयभागमात्राक्षेत्रावगाहा एव विद्यंते यदा उत्तमा सामान्येन विवक्ष्यंते तदा सर्वा अपि परमाणुव- १८
र्गणाद्याः सर्वोत्कृष्टमहास्कंधवर्गणापर्यवसानाः प्रत्येकमनंतानंताः सकललोकाश्रिताश्च वर्गणाः ।
श्व त्वेकं ४.२

तथा कर्मणः शरीरप्रायोग्यवर्गणां आरभ्य सर्वा अप्यौदारिकशरीरप्रायोग्यवर्गणा यावत् तावदङ्गु-
लावगाहो असंख्येयगुणो द्रष्टव्यः तथाहि कर्मवर्गणावगाहक्षेत्रात् तनोर्वर्गणावगाहक्षेत्रं प्रदेशतो- न
ऽसंख्येयगुणं ततोऽपि आनप्राणावगाहक्षेत्रं प्रदेशतोऽसंख्येयगुणमित्यादि द्रष्टव्यं यो वेदितव्यः ।
उत्कृष्टस्कंधश्चतुर्दशरज्जुप्रमाणादिरूपतया परिणमयतां स्कंधानां तत्र तावदुत्कृष्टानां किं तावद्वेदितव्यम् ।
उत्कृष्टं तत्र सर्वलोकव्याप्तत्वं प्रथमे वक्तव्यम् । क्वाप्यसंख्येयतितीर्थकरस्य वर्गणासु विग्रहणा द्रव्यस्य
ग्रहणयोग्यत्वेन आदेशमात्रेण ग्रहणयोग्यस्य । जीवा विप्रसावगाहनास्कंधं इह जीवः स्वप्रदेशाव-
गाहमवदलिकं गृह्णाति न च अनंतरपरंपर- स्वप्रदेशावगाढं तदेकस्मिन् जीवप्रदेशे तथा
दवगाढं ग्रहणयोग्यं ग्रहणप्रायोग्यं दलिकं । तदेकमपि गृह्णाति सर्वैरात्मप्रदेशैर्गृह्णाति ।
तथाः जीवप्रदेशानां सर्वेषामपि श्रृंखलावयः । वाता मिव परस्परं संबद्धविशेषतावात् तथाहि एक-
स्मिन् प्रदेशे जीवस्यावगाढं ग्रहणप्रायोग्यं दलिकं ग्रहणाय व्याप्रियमाणे सर्वेष्वात्मप्रदे-
नं शेष्वनंतरपरंपरतया तद्ग्रहणाय व्याप्रियंते यथा हस्ताग्रेण किंचिद्गृह्यते तदा मणिबंधादिकरप्रमाणे
मणिबंधकूर्परांसादयोऽपि तद्ग्रहणाय अनंतरपरंपरतया व्याप्रियंते तथा सर्वजीवाविशेषाः सर्वत्राऽपि ।
सर्वेऽपि जीवप्रदेशाः प्रायेणावगाढग्रहणप्रायोग्याः स्कंधास्तानपि ग्रहणप्रायोग्यान् स्कंधान् सर्वविरुद्

कर्म।प्र।
१८

ज्ञातिजीवः सर्वस्मिन् सर्वैरात्मप्रदेशैरेकैकस्कंधप्रदेशे इति सर्वजीवप्रदेशानामनंतरपरंपर
तया व्याप्तिप्रमाणत्वात् इदं च पुद्गलद्रव्याणां परस्परं संबंधः स्नेहादृते न वर्तते ततः प्रथमं स्नेहप्ररूपणा।
कर्तव्या सा च त्रिधा तद्यथा स्नेहप्रत्ययस्पर्धकप्ररूपणा नामप्रत्ययस्पर्धकप्ररूपणा प्रयोगप्रत्यय
स्पर्धकप्ररूपणा च। तत्र स्नेहः प्रत्ययो यस्य स्नेहनिमित्तस्य स्पर्धकस्य प्ररूपणा स्नेहप्रत्ययस्पर्धकप्ररू
पणा। तथा शरीरबंधननामकर्मोदयतः परस्परं बद्धानां शरीरपुद्गलानां स्नेहमधिकृत्य स्पर्धकप्ररू
पणा नामप्रत्ययस्पर्धकप्ररूपणा शाष्टार्थः॥ अथवा नाम प्रत्ययो यस्य बंधननामनिमित्तस्य स्पर्धकस्य। *स्पर्धकस्य
र्धकस्य प्ररूपणा। तथा प्रकृष्टो योगः प्रयोगः॥ योगः। तेन प्रत्ययभूतेन कारणभूतेन या श
नामप्रत्ययस्य स्पर्धकप्ररूपणा रीरतः पुद्गलास्तेषां स्नेहमधिकृत्य स्पर्धकप्ररूपणा प्रयोगस्पर्धकप्रत्ययस्पर्धकप्ररूपणा तत्र प्रथ
मतः स्नेहप्रत्ययस्पर्धकप्ररूपणार्थमाह॥ ७॥ नेहप्पच्चयफड्डगमेगं अविभागवग्गणाणंता हस्से ग्र
ण बहू बद्धा असंखलोगे दुगुणा॥ स्नेहप्रत्ययं स्नेहनिमित्तमेकैकस्नेहाविभागवृद्धानां पुद्गल
वर्गणानां समुदायरूपं स्पर्धकं स्नेहप्रत्ययस्पर्धकं तच्चैकमेव भवति। तस्मिंश्च स्पर्धके अविभागव
र्गणा एकैकस्नेहाविभागाधिकपरमाणुसमुदायरूपा वर्गणा अनंता इत्यर्थः। तत्र ह्रस्वेन अल्पेन स्ने १८
हेन ये बद्धाः पुद्गलास्ते बहवः प्रभूताः तेभ्यो वृद्धेन बद्धाः स्तोकाः। तत्र असंख्येयलोकाः द्विगुणहीनाः।

×अनंतानंतवर्गणाः एकोत्तरवृद्धाः स्नेहबद्धेन ... ×५३

णाः। आदिवर्गणायाः परतः असंख्येयलोकाकाशप्रदेशप्रमाणा वर्गणा अतिक्रम्य याः अनंत
रा वर्गणा तस्यां पुद्गलाः प्रथमवर्गणागतपुद्गलापेक्षया द्विगुणहीना वर्तन्ते ततोऽप्यसंख्ये
यलोकाकाशप्रदेशप्रमाणा वर्गणा अतिक्रम्य अनंतरायां वर्गणायां पुद्गला द्विगुणहीना वर्तन्ते एवं
तावद्वाच्यं यावदसंख्येयलोकाकाशप्रमाणा द्विगुणहानयः चरमा [illegible] वर्गणा इत्यसमस्तानां इदयः सार्वा।
केवलिप्रज्ञाच्छेदनकेन छिद्यमानो यो न द्विधा भवति सोऽविभाग इति अविभागानामेकद्वित्र्यादि
संख्या तत्र जघन्यतोऽपि केवलपरमाणौ एके नास्त्येव अनंता अविभागा नन्वानंता उक्ताः।
संतीति तेषां समुदायः प्रथमा वर्गणा ततः एकेनाधिकानां स्नेहाविभागानां युक्तानां परमाणूनां स
मुदायो द्वितीया वर्गणा एवं त्रिभिः। स्नेहाविभागैर्युक्तानां समुदायः तृतीया वर्गणा
एवं संख्येयैः स्नेहाविभागैर्युक्तानां संख्येया वर्गणा वाच्याः असंख्येयैः स्नेहाविभागैर्युक्तानां स
मुदायः तृतीया वर्गणा एवं संख्येयैः स्नेहाविभागैर्युक्तानां संख्येया वर्गणा वाच्याः असंख्येयैः स्ने
हाविभागैर्युक्तानां उत्तरसंख्येया वर्गणाः अनंतानां स्नेहाविभागैर्युक्तानां अनंता वर्गणाः इह प्ररू
पणा तद्यथा अनंतरोपनिधया परंपरोपनिधया च तत्र तावदनंतरोपनिधया प्ररू
पणा क्रियते प्रथमायां वर्गणायां सर्वाल्पस्नेहाविभागयुक्तपुद्गलसमुदायरूपायां ... पुद्गलास्ते

द्वापकृष्ट्या द्वितीयस्यां वर्गणायां भ्रद्वा त्रिप्रदेशाउत्कृष्टानां प्रदेशायां उत्कृष्टा असंख्येयप्र-
देशाधिका भवंति ततोपि द्वितीयस्यां वर्गणायां असंख्येयप्रदेशाधिका। एवं उत्कृष्टवर्गणा असंख्येयप्र-
देशाधिका उत्कृष्टा। तावद्यावदनंता वर्गणा गता भवंति ततोऽनंतरायां उत्कृष्टा। प्राक्तनवर्गणा
गतउत्कृष्टापेक्षया संख्येयप्रदेशाधिका भवंति ततोऽग्रतन्यां उत्कृष्टा। संख्येयप्रदेशाधिका। एवं संख्ये-
यप्रदेशाधिका अपि वर्गणा अनंता वाच्या। ततोऽनंत- | रायां वर्गणायां गतउत्कृष्टापेक्षया संख्येयगुणप्रदे- ×योउत्कृ
शाधिका भवंति ततोऽग्रतन्यामपि वर्गणायां उ- | त्कृष्टा संख्येयगुणप्रदेशा। एवं संख्येयगुणप्रदे- ष्टापकृ
शाधिका अनंता वर्गणा वाच्या। ततोऽनंतरायां | वर्गणायां उत्कृष्टा प्राक्तनवर्गणागत उत्कृ- न×
ष्टापेक्षया असंख्येयगुणप्रदेशाधिका भवंति। | ततोऽग्रतन्यामपि वर्गणायां उत्कृष्टा असंख्ये-
यगुणप्रदेशा। एवमसंख्येयगुणप्रदेशा अपि अ- | नंता वक्तव्या। ततोऽनंतरायां वर्गणायां उत्कृष्टा। प्रा-
क्तनवर्गणागत उत्कृष्टापेक्षया अनंतगुणप्रदेशाधिका भवंति ततोऽग्रतन्यामपि वर्गणायां उत्कृष्टा अ-
नंतगुणप्रदेशा। एवमनंतगुणप्रदेशा अप्यनंता वर्गणा वाच्या। यावत्सर्वोत्कृष्टा वर्गणा। तदेवं कृता अनंत-
रोपनिधया प्ररूपणा। संप्रति परंपरोपनिधया क्रियते। तत्र प्रथमवर्गणायाः परतः असंख्येयलोकाका- २०
शप्रदेशप्रमाणा वर्गणा अतिक्रम्य या परतोऽग्रतया वर्गणा तस्यां उत्कृष्टा। प्रथमवर्गणागतउत्कृष्टापेक्षया॥

द्विगुणप्रदेशा भवंति अर्धाधिका भवंतीत्यर्थः। ततोऽनंतरमसंख्येयलोकाकाशप्रदेशप्रमाणा वर्गणा अतिक्रम्य
या परा अनंतरा वर्गणा तस्यां उत्कृष्टा द्विगुणा भवंति एवं द्विगुणवृद्ध्या तावद्वक्तव्यं यावदसंख्येयप्रदेशा-
धिकानां चरमा वर्गणा ततः परं संख्येयप्रदेशाधिकानां गता वर्गणा संख्येया अतिक्रम्यानंतरायां वर्गणायां
उत्कृष्टा असंख्येयप्रदेशाधिकानां चरमवर्गणा उत्कृष्टापेक्षया द्विगुणा भवंति ततोऽनंतरस्मिन् संख्येया व-
र्गणा अतिक्रम्यानंतरायां वर्गणायां उत्कृष्टा द्वि- | गुणा भवंति एवं द्विगुणवृद्ध्या तावद्वक्तव्यं यावत्संख्ये-
यप्रदेशाधिकानामपि चरमा वर्गणा उपरितनाः | चतिसृष्टदानि द्विगुणवृद्धिपरंपरोपनिधया न संभवंति।
यतः प्रथमायामपि संख्येयगुणप्रदेशाधिकव- | र्गणायामुत्कृष्टा संख्येयप्रदेशाधिकानां चरम-
वर्गणागत उत्कृष्टापेक्षया संख्येयगु- | णप्रदेशाधिका संख्येयगुणप्रदेशाधिका जघन्यतो
ऽपि त्रिगुणप्रदेशाधिका उत्कृष्टगुणप्रदेशाधिका वा भवंति ततो द्वि- | गुणप्रदेशाधिकाः यतः संख्येयमुत्कृष्टं सर्वत्रापि जघन्योत्कृ-
ष्टत्रिगुणादिवर्धनात तन्नु द्विगुणादिमा विकृष्टं तदुत्कृष्टमसंख्येयप्रदेशाधिका। सिद्धांत यत्र तत्र संख्येयगु-
णप्रदेशाधिका तत्र संख्येयप्रदेशमपि कामं द्विगुणवृद्धिर्भवति तदुत्कर्षे द्विगुणप्रदेशाधिकानां संभवति किंतु त्रिगुणादय उ-
णाधिकानाः इति द्विगुणप्रदेशाधिका परंपरोपनिधया संभवंति तस्मान्मूलतस्तत्र न आरभ्य अन्या वा परंपरोपनि-
धया प्ररूपणा क्रियते तत्र संख्येयप्रदेशाधिकानां प्रथमादिमवर्गणा ... परंपरानंतरा प्रथमवर्गणापेक्षया

कर्मप्र। काश्चित् वर्गणा असंख्येयभागहीनाः काश्चित्संख्येयभागहीनाः काश्चित्संख्येयगुणहीनाः काश्चिदसं
२२ ख्येयगुणहीनाः काश्चिदनंतगुणहीनाः एवमसंख्येयभागहानौ प्रथमवर्गणापेक्षया पंचापि हानयः
संभवंति असंख्येयभागहानौ असंख्येयभागहानिवर्जाः शेषाश्चतस्रोपि हानयः संभवंति तद्यथा असंख्ये
यभागहानि प्रथमांतिमवर्गणाद्वयापांतरालप्रथमवर्गणापेक्षया काश्चित् वर्गणाः संख्येयभागहीना
:काश्चित्संख्येयगुणहीनाः काश्चिदसंख्येयगु णहीनाः काश्चिदनंतगुणहीनाः संख्येयगुणहा
नाग× नौ तु असंख्येयहानिसंख्येयभागहानिवर्जाः शेषास्तिस्रो हानयः संभवंति तद्यथा संख्ये
यगुणहानौ प्रथमांतिमवर्गणाद्वयापांतरा लप्रथमवर्गणापेक्षया काश्चिद्वर्गणाः सं
ख्येयगुणहीनाः काश्चिदसंख्येयगुणहीनाः॥ काश्चिदनंतगुणहीनाः [illegible] असंख्येयगुणहा
नौ तु न केवलहानौ तथाहि [illegible] असंख्ये॥ यगुणहानौ प्रथमांतिमवर्गणाद्वयापांतरालप्र
थमवर्गणापेक्षया काश्चिद्वर्गणा असंख्येयगुणहीनाः काश्चिदनंतगुणहीनाः अनंतगुणहानौ त्व
नंतगुणहानिरेवैकांतादेवं कृतोपनिधया प्ररूपणा सांप्रतमल्पबहुत्वमुच्यते तत्रासंख्येयभागहानौ म×
वर्गणाः स्तोकाः ताभ्यः संख्येयभागहानौ वर्गणा अनंतगुणाः ताभ्योपि संख्येयगुणहानौ वर्गणा अ २१
नंतगुणाः ताभ्योप्यसंख्येयगुणहानौ वर्गणा अनंतगुणाः ताभ्योप्यनंतगुणहानौ वर्गणा अनंतगुणाः

तथा अनंतगुणहानौ पुद्गलाः सर्वस्तोकाः ततोऽसंख्येयगुणहानौ अनंतगुणाः पुद्गलाः ततोपि संख्ये
यगुणहानौ पुद्गला अनंतगुणाः ततोपि संख्येयभागहानौ पुद्गला अनंतगुणाः ततोप्यसंख्येयभा
गहानौ पुद्गला अनंतगुणाः तदेवमुक्तं सप्रपंचं स्नेहप्रत्ययस्पर्द्धकमिदानीं नामप्रत्ययस्पर्द्धकप्र
योगप्रत्ययस्पर्द्धकप्ररूपणाचिकीर्षुरिदमाह॥ नामप्पओगपच्चयगाण अविभागणंतगुणणाए
धणियाइसमगुणासिजदवा जहसमाकंडइ २२ नामप्रत्ययस्पर्द्धकप्ररूपणायां षट् अनुयोगद्वारा
णि अविभागप्ररूपणा वर्गणाप्ररूपणा स्प र्द्धकप्ररूपणा अंतरप्ररूपणा वर्गणापुद्ग
लस्नेहाविभागसकलसमुदायप्ररूप॥ णा स्थानप्ररूपणा चेति तत्र प्रथमतोऽवि
भागप्ररूपणा क्रियते औदारिकादिशरी रपंचकप्रायोग्याणां परमाणूनां यो रसः केव
लिप्रज्ञाछेदनकेन छिद्यते विभागावतिविभागा भागाः कियंतस्तेभिर्वि भागाभागागुणपरमाणौ
जीवानंतावपरमाणावावाप्यंते एषा अविभागप्ररूपणा तत्र एकेन स्नेहाविभागेन युक्ताः शरीर
अदारिक योग्याः पुद्गला न लभ्यंते किंतु अनंतैः औदारिकबंधनादीनां पंचदशानां बंधनानामन्यतमस्यापि
बंधनस्य विषयाननवंतात्यर्थः नापि [illegible] द्वाभ्यां स्नेहाविभागाभ्यां युक्ता नापि त्रिभिः नापि संख्यातैः ना
प्यसंख्यातैः नाप्यनंतैः किंत्वनंतानंतैरेव सर्वजीवेभ्योऽनंतगुणैः युक्तानां पुद्गलानां समुदायः प्रथमा
= त्वनंत =

कर्म॰टी॰ वर्गणा सा च जघन्या ततः एकेन स्नेहाविभागेनाधिकानां उज्वलानां समुदायो द्वितीया वर्गणा द्वाभ्यां
२२ स्नेहाविभागाभ्यामधिकानां समुदायः तृतीया वर्गणा एवमेकैकाविभागवृद्ध्या निरंतरं तावद्वर्गणा
वाच्या यावदभव्येभ्योऽनंतगुणाः सिद्धानामनंतभागकल्पा भवंति एतासां च समुदाय एकं स्पर्द्धकं
ततः ऊर्ध्वमेकेनाप्य स्नेहाविभागेनाधिकाः परमाणवो न प्राप्यंते नापि द्वाभ्यां नापि त्रिभिः नापि सं
ख्येयैर्नाप्यसंख्येयैर्नाप्यनंतैः किंत्वनंतानंतैः एव सर्वजीवेभ्योऽनंतगुणैरधिकाः प्राप्यंते ततस्ते
षां समुदायो द्वितीयस्पर्द्धकस्य प्रथमा वर्गणा ततस्यां कियंतः स्नेहाविभागा इति चेदुच्यते
यावंतः प्रथमस्पर्द्धकप्रथमवर्गणायां स्ने हाविभागास्तावंतो द्विगुणाः ततः एकेन स्ने
हाविभागेनाधिकानां परमाणूनां समुदा यो द्वितीया वर्गणा द्वाभ्यां स्नेहाविभागाभ्याम
धिकानां समुदायस्तृतीया वर्गणा एवमेकैक स्नेहाविभागवृद्ध्या निरंतरं वर्गणास्तावद्वाच्या या
वदभव्येभ्योऽनंतगुणाः सिद्धानामनंतभागकल्पा भवंति तदेतासां समुदायो द्वितीयं स्पर्द्धकं ततः ऊ
र्ध्वमतः ऊर्ध्वमेकेनाप्य स्नेहाविभागेनाधिकाः परमाणवो न प्राप्यंते नापि द्वाभ्यां नापि त्रिभिः यावन्नापि सं
ख्येयैर्नाप्यसंख्येयैर्नाप्यनंतैः किंत्वनंतानंतैरेव सर्वजीवेभ्योऽनंतगुणैस्ततस्तेषां परमाणूनां २२
समुदायस्तृतीयस्पर्द्धकस्य प्रथमा वर्गणा तस्यां कियंतः स्नेहाविभागा इति चेदुच्यते यावंतः प्रथम

स्पर्द्धकस्य प्रथमवर्गणायां तावंतः त्रिगुणाः ततः एकेन स्नेहाविभागेनाधिकानां परमाणूनां समुदायो
द्वितीया वर्गणा द्वाभ्यां स्नेहाविभागाभ्यामधिकानां समुदायस्तृतीया वर्गणा एवमेकैकस्नेहावि
भागवृद्ध्या निरंतरं वर्गणास्तावद्वाच्या यावदभव्येभ्योऽनंतगुणाः सिद्धानामनंतभागकल्पा भवंति ततस्ता
सां समुदायस्तृतीयं स्पर्द्धकं ततः ऊर्ध्वमतः ऊर्ध्वमेकेनापि स्नेहाविभागेनाधिकाः परमाणवो न प्राप्यंते
नापि द्वाभ्यां नापि त्रिभिः यावन्नापि संख्येयैर्नाप्य संख्येयैर्नाप्यनंतैः किंत्वनंतानंतैरेव सर्वजी
वेभ्योऽनंतगुणैरधिकाः प्राप्यंते ततस्तेषां समु दायश्चतुर्थस्य स्पर्द्धकस्य प्रथमा वर्गणा तस्यां
कियंतः स्नेहाविभागा इति चेदुच्यते प्र थमस्पर्द्धकस्य प्रथमवर्गणायां यावंतः
स्नेहाविभागास्तावंतश्चतुर्गुणाः एवं यावंति संख्ये यानि स्पर्द्धकानि चिंतयितुमारभ्यंते तद्यथा
पंचमं दशमं विंशतितमं संख्येयतमं वा तत्र संख्यागुणिताः प्रथमस्पर्द्धकस्य प्रथमव
र्गणागताः स्नेहाविभागास्तावंति संख्येयतमस्य स्पर्द्धकस्यादिवर्गणायां द्रष्टव्याः तानि च स्पर्द्धका
नि कियंति भवंतीति चेदुच्यते अभव्येभ्योऽनंतगुणानि सिद्धानामनंतभागकल्पानि अत्रैतानि कि
यंति भवंतीति चेदुच्यते स्थानस्पर्द्धकतुल्यानि तथा द्विचतुर्गसमंतराणि भवंति तानि ना
धिकानि प्रथमत्रापि तावती यं वर्गणास्थानं तावद्यावद्वत्तः तद्यथा एकैकाविभागवृद्धिः अनंतानं

कर्मप्र० न विभागवृद्धिः अनंतगुणवृद्धिः किंतु विभागवृद्धिः स्पर्द्धकगतानां वर्गणानां यथा प्राग्वत् अनंतानंतविभाग।
२३ वृद्धिः प्राप्तास्पर्द्धकगतचरमवर्गणापेक्षया उत्तरस्य स्पर्द्धकस्यादिवर्गणायाः पारंपर्येण पुनः
प्रथमस्पर्द्धकप्रथमवर्गणापेक्षया षड्वृद्धयः संभवात् तद्यथा अनंतभागवृद्धिः असंख्ये
